श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकाण्डे

# ॥ षद्विष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ षट्षष्टितमः सर्गः ॥

## राजार्थं कौसल्याया विलापस्तत्कर्तृकं कैकेय्या भर्त्सनं मन्त्रिभी राज्ञः शवस्य तैलपूर्णे कटाहे स्थापनं विलापोऽयोध्यापुर्य्याः श्रीहीनता पुरवासिनां शोकश्च

तमग्निमिव संशान्तमम्बुहीनमिवार्णवम्।
गतप्रभमिवादित्यं स्वर्गस्थं प्रेक्ष्य भूमिपम्॥ **2.66.1** ॥

कौसल्या बाष्पपूर्णाक्षी विविधं शोककर्शिता।
उपगृह्य शिरो राज्ञः कैकेयीं प्रत्यभाषत॥ **2.66.2** ॥

सकामा भव कैकेयि भुङ्क्ष्व राज्यमकण्टकम्।
त्यक्त्वा राजानमेकाग्रा नृशंसे दुष्टचारिणि॥ **2.66.3** ॥

विहाय मां गतो रामो भर्ता च स्वर्गतो मम।
विपथे सार्थहीनेव नाहं जीवितुमुत्सहे॥ **2.66.4** ॥

भर्तारं तु परित्यज्य का स्त्री दैवतमात्मनः।
इच्छेज्जीवितुमन्यत्र कैकेय्यास्त्यक्तधर्मणः॥ **2.66.5** ॥

न लुब्धो बुध्यते दोषान् किम्पाकमिव भक्षयन्।
कुब्जानिमित्तं कैकेय्या राघवाणां कुलं हतम्॥ **2.66.6** ॥

अनियोगे नियुक्तेन राज्ञा रामं विवासितम्।
सभार्यं जनकः श्रुत्वा परितप्स्यत्यहं यथा॥ **2.66.7** ॥

स मामनाथां विधवां नाद्य जानाति धार्मिकः।
रामः कमलपत्राक्षो जीवन्नाशमितो गतः॥ **2.66.8** ॥

विदेहराजस्य सुता तथा चारुतपस्विनी।
दुःखस्यानुचिता दुःखं वने पर्युद्विजिष्यति॥ **2.66.9** ॥

नदतां भीमघोषाणां निशासु मृगपक्षिणाम्।
निशम्यमाना सन्त्रस्ता राघवं संश्रयिष्यति॥ **2.66.10** ॥

वृद्धश्चैवाल्पपुत्रश्च वैदेहीमनुचिन्तयन्।
सोऽपि शोकसमाविष्टो नूनं त्यक्ष्यति जीवितम्॥ **2.66.11** ॥

साहमद्यैव दिष्टान्तं गमिष्यामि पतिव्रता।
इदं शरीरमालिङ्ग्य प्रवेक्ष्यामि हुताशनम्॥ **2.66.12** ॥

तां ततः सम्परिष्वज्य विलपन्तीं तपस्विनीम्।
व्यपनिन्युः सुदुःखार्तां कौसल्यां व्यावहारिकाः॥ **2.66.13** ॥

तैलद्रोण्यां तदामात्याः संवेश्य जगतीपतिम्।
राज्ञः सर्वाण्यथादिष्टाश्चक्रुः कर्माण्यनन्तरम्॥ **2.66.14** ॥

न तु सङ्कालनं राज्ञो विना पुत्रेण मन्त्रिणः।
सर्वज्ञाः कर्तुमीषुस्ते ततो रक्षन्ति भूमिपम्॥ **2.66.15** ॥

तैलद्रोण्यां शायितं तं सचिवैस्तु नराधिपम्।
हा मृतोऽयमिति ज्ञात्वा स्त्रियस्ताः पर्यदेवयन्॥ **2.66.16** ॥

बाहूनुच्छ्रित्य कृपणा नेत्रप्रस्रवणैर्मुखैः।
रुदन्त्यः शोकसन्तप्ताः कृपणं पर्यदेवयन्॥ **2.66.17** ॥

हा महाराज रामेण सन्ततं प्रियवादिना।
विहीनाः सत्यसन्धेन किमर्थं विजहासि नः॥ **2.66.18** ॥

कैकेय्या दुष्टभावाया राघवेण विवर्जिताः।
कथं सपत्न्या वत्स्यामः समीपे विधवा वयम्॥ **2.66.19** ॥

स हि नाथः स चास्माकं तव च प्रभुरात्मवान्।
वनं रामो गतः श्रीमान् विहाय नृपतिश्रियम्॥ **2.66.20** ॥

त्वया तेन च वीरेण विना व्यसनमोहिताः।
कथं वयं निवत्स्यामः कैकेय्या च विदूषिताः॥ **2.66.21** ॥

यया च राजा रामश्च लक्ष्मणश्च महाबलः।
सीतया सह सन्त्यक्ताः सा कमन्यं न हास्यति॥ **2.66.22** ॥

ता बाष्पेण च संवीताः शोकेन विपुलेन च।
व्यचेष्टन्त निरानन्दा राघवस्य वरस्त्रियः॥ **2.66.23** ॥

निशा नक्षत्रहीनेव स्त्रीव भर्तृविवर्जिता।
पुरी नाराजतायोध्या हीना राज्ञा महात्मना॥ **2.66.24** ॥

बाष्पपर्याकुलजना हाहाभूतकुलाङ्गना।
शून्यचत्वरवेश्मान्ता न बभ्राज यथापुरम्॥ **2.66.25** ॥

गते तु शोकात् त्रिदिवं नराधिपे
महीतलस्थासु नृपाङ्गनासु च।
निवृत्तचारः सहसा गतो रविः
प्रवृत्तचारा रजनी ह्युपस्थिता॥ **2.66.26** ॥

ऋते तु पुत्राद् दहनं महीपते -
र्नारोचयंस्ते सुहृदः समागताः।
इतीव तस्मिन् शयने न्यवेशयन्
विचिन्त्य राजानमचिन्त्यदर्शनम्॥ **2.66.27** ॥

गतप्रभा द्यौरिव भास्करं विना
    व्यपेतनक्षत्रगणेव शर्वरी।
पुरी बभासे रहिता महात्मना
    कण्ठास्रकण्ठाकुलमार्गचत्वरा ॥ **2.66.28** ॥

नराश्च नार्यश्च समेत्य सङ्घशो
    विगर्हमाणा भरतस्य मातरम्।
तदा नगर्यां नरदेवसङ्क्षये
    बभूवुरार्ता न च शर्म लेभिरे ॥ **2.66.29** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
अयोध्याकाण्डे षड्षष्टितमः सर्गः ॥